# Shakrakrita Shri Ganesha Stuti

# શક્રકૃતા શ્રીગણેશસ્તુતિઃ

## Document Information

Text title : Shakrakrita Shri Ganesha Stuti

File name : gaNeshastutiHshakrakRRitA.itx

Category : ganesha, gaNeshapurANa, stuti

Location : doc_ganesha

Proofread by : Preeti Bhandare

Description/comments : shrIgaNeshapurANaM krIDA (uttara)khaNDaH | adhyAyaH 11 | 2.11 26-46||

Latest update : April 20, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 20, 2024

*sanskritdocuments.org*

# Shakrakrita Shri Ganesha Stuti

# શક્રકૃતા શ્રીગણેશસ્તુતિઃ

શક્ર ઉવાચ ।
ભૂભારહરણાર્થં યો જાતઃ કશ્યપનન્દનઃ ।
અચિન્ત્યો મહિમા યસ્ય કિમુ વર્ણ્યો ભવેન્મમ ॥ ૨૬॥

નિર્ગમં દેહિ દેવેશ ! કુક્ષેરત્યન્તવિસ્તરાત્ ।
અદૃષ્ટપારાદ્ વર્ષાણિ દ્વાદશ ભ્રમતા મયા ॥ ૨૭॥

તવ કુક્ષૌ મયાઽદર્શિ ભુવનાનિ ચતુર્દશ ।
સ્થાને સ્થાને વિભક્તાનિ પ્રતિરોમાઙ્ચમેકરાટ્ ॥ ૨૮॥

સમષ્ટિવ્યષ્ટિરૂપાણિ મહાવિસ્તારવન્તિ ચ ।
દૃષ્ટાનિ તવ રૂપાણિ સુસૌમ્યાનીતરાણિ ચ ॥ ૨૯॥

અદ્ભુતાન્યપ્યસઙ્ખ્યાનિ વક્ત્રાણિ નયનાનિ ચ ।
દૃષ્ટ્વા દુર્દર્શરૂપાણિ જગત્ક્ષોભકરાણિ તે ॥ ૩૦॥

દૈત્યદાનવપૂર્ણાનિ સુરમાનવવન્તિ ચ ।
યક્ષરક્ષઃપિશાચાદિચતુરાકરવન્તિ ચ ॥ ૩૧॥

વિકરાલમહોરૂપમુપસંહર વિશ્વકૃત્ ! ।
ગતો મોહં સ્મૃતિર્લબ્ધા પ્રસાદાન્નિખિલેશ્વર ॥ ૩૨॥

કાયેન મનસા બુદ્ધ્યા વાચા ત્વાં શરણં ગતઃ ।
પ્રાકૃતં દર્શય વિભો ! રૂપં તે ભક્તવત્સલ ॥ ૩૩॥

ક ઉવાચ ।
એવં યાવત્ પ્રાર્થયતે સ્વાત્માનં તાવદેવ સઃ ।
સભામધ્યગતં તં ચદદર્શ બ્રહ્મચારિણમ્ ॥ ૩૪॥

પશ્યતાં સર્વલોકાનાં સાષ્ટાઙ્ગં પ્રણનામ તમ્ ।
અતિવિસ્મિતચિત્તોઽસૌ લજ્જાહર્ષસમન્વિતઃ ॥ ૩૫॥

શ઼ૃણ્વસ્તુ સર્વદેવેષુ નુનાવ બ્રહ્મચારિણમ્ ।
જાતં મુનિગૃહે શાન્તં ક્રીડામાનુષરૂપિણમ્ ॥ ૩૬॥

શક્ર ઉવાચ ।
જાને ન ત્વાઽનન્તશક્તિં પરેશં વિશ્વાત્માનં વિશ્વબીજં ગુણેશમ્ ।
વિશ્વાભાસં વિશ્વવન્દ્યં ત્રિસત્યં ત્રેધાભૂતં જન્મરક્ષાર્તિહેતુમ્ ॥ ૩૭॥

એકં નિત્યં સચ્ચિદાનન્દરૂપં સર્વાધ્યક્ષં કારણાતીતમીશમ્ ।
ચેષ્ટાહેતું સ્થાવરે જઙ્ગમે ચ વાઞ્છાપૂરં સર્વગં ત્વાઽભિવન્દે ॥ ૩૮॥

સર્વેશાનં સર્વવિદ્યાનિધાનં સર્વાત્માનં સર્વબોધાવભાસમ્ ।
સર્વાતીતાઽવાઙ્મનોગોચરં ત્વાં સર્વાવાસં સર્વવિજ્ઞાનમીડે ॥ ૩૯॥

ક ઉવાચ ।
એવં સ્તુત્વા ચ નત્વા ચ સમ્પૂજ્ય સ્વાઙ્કુશં દદૌ ।
કલ્પવૃક્ષં ચદાસ્યૌ દ્વે વિનાયક ઇતિ સ્ફુટમ્ ॥ ૪૦॥

ચકાર નામ શક્રોઽથ સ્મરણાત્ સર્વસિદ્ધિદમ્ ।
જયશબ્દૈર્નમઃશબ્દૈર્વાદ્યશબ્દૈરનેકધા ॥ ૪૧॥

ગન્ધર્વગીતનિનદૈરપ્સરોનૃત્યનિસ્વનૈઃ ।
વ્યાપ્તમાસીત્ પુષ્પવર્ષૈસ્તદા વ્યોમ ધરાતલમ્ ॥ ૪૨॥

પ્રતિકૂલવહા નદ્ય આસન્ પૂર્વવહાઃ શુભાઃ ।
પ્રસન્નમાસીદ્ દિક્ચક્રં વવુર્વાતાઃ સુખાવહાઃ ॥ ૪૩॥

પ્રદક્ષિણાર્ચિષઃ શાન્તા આસન્ સર્વત્ર વહ્નયઃ ।
તતઃ પ્રસન્નઃ શક્રાય દદાવભયમેકરાટ્ ॥ ૪૪॥

ભવિતા ન ભયં ક્વાપિ તવ શક્ર ! રણાજિરે ।
પઠસ્વ સ્ત્રોત્રમેતત્ ત્વં ત્રિસન્ધ્યં ભક્તિતત્પરઃ ॥ ૪૫॥

અન્યોઽપિ યઃ પઠેદ્ ભક્ત્યા શ્લોકત્રયમિદં નરઃ ।
સ સર્વાનાપ્નુયાત્ કામાન્ સર્વત્ર વિજયી ભવેત્ ॥ ૪૬॥

ઇતિ શક્રકૃતા શ્રીગણેશસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ શ્રીગણેશપુરાણં ક્રીડા (ઉત્તર)ખણ્ડઃ । અધ્યાયઃ ૧૧ । ૨.૧૧ ૨૬-૪૬॥

- .. shrIgaNeshapurANaM krIDA (uttara)khaNDaH . adhyAyaH 11 . 2.11 26-46..

Proofread by Preeti Bhandare

*Shakrakrita Shri Ganesha Stuti*

pdf was typeset on April 20, 2024

Please send corrections to *sanskrit@cheerful.com*